# Payovratasamaye Karaniyam Vishnu Stotram

# पयोव्रतसमये करणीयं विष्णुस्तोत्रम्

## Document Information

Text title : Payovratasamaye Karaniyam Vishnu Stotram

File name : payovratasamayekaraNIyaMviShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 148/17-26||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# पयोव्रतसमये करणीयं विष्णुस्तोत्रम्

नमो भगवते तुभ्यं परपुंसे नमो नमः ॥ १७॥

सर्वान्तःकृतवासाय वासुदेवाय साक्षिणे ।
नमोऽव्यक्ताय सूक्ष्माय व्यक्तपुंसे नमो नमः ॥ १८॥

चतुर्विंशतितत्त्वाय विकृतिहेतवे नमः ।
नमो द्विमूर्ध्ने त्रिपदे चतुःशृङ्गाय सूत्रिणे ॥ १९॥

सप्तहस्ताय क्रतवे वेदत्रयात्मने नमः ।
महादेवाय रुद्राय वृषभाय नमो नमः ॥ २०॥

यावद्विद्याऽधिष्ठिताय प्राणिनां पतये नमः ।
नमो हिरण्यकोशाय जगत्प्राणात्मने नमः ॥ २१॥

योगसिद्ध्यैश्वर्यवते योगकर्त्रे च ते नमः ।
नमः सर्वादिदेवाय नमस्ते चात्मवर्तिने ॥ २२॥

नमस्ते हरिकृष्णाय नरनारायणर्षये ।
नमः इन्दीवरश्यामवपुषे श्रीमते नमः ॥ २३॥

नमस्ते केशवानन्त! पीतवस्त्रवते नमः ।
वरदाता वरेण्यश्च त्वं जनाभीष्टदः प्रभुः ॥ २४॥

उपासिता मोक्षदा वै तव पादादिरेणवः ।
देवास्त्वामनुवर्तन्ते स्थिता श्रीस्तव पादयोः ॥ २५॥

स्पृहयामि कृपाऽऽमोदं भगवन्मे प्रसीदताम् ।
इति संस्तूय तं कृष्णमावाहयेज्जगद्गुरुम् ॥ २६॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १४८-अध्यायान्तर्गतं पयोव्रतसमये करणीयं विष्णुस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १४८/१७-२६॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 148/17-26..

Proofread by PSA Easwaran

*Payovratasamaye Karaniyam Vishnu Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*